# Brahmadidevaih Kritam Shri Krishna Stotram

# બ્રહ્માદિદેવૈઃ કૃતં શ્રીકૃષ્ણસ્તોત્રમ્

## Document Information

Text title : Brahmadidevaih Kritam Shri Krishna Stotram

File name : brahmAdidevaiHkRRitaMshrIkRRiShNastotram.itx

Category : vishhnu, vishnu, krishna, bhAgavatapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bhAgavatapurANa | adhyAya 11/6/7-19||

Latest update : October 1, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 3, 2025

*sanskritdocuments.org*

# બ્રહ્માદિદેવૈઃ કૃતં શ્રીકૃષ્ણસ્તોત્રમ્

દેવા ઊચુઃ ।
નતાઃ સ્મ તે નાથ પદારવિન્દં
બુદ્ધીન્દ્રિયપ્રાણમનોવચોભિઃ ।
યચ્ચિન્ત્યતેઽન્તર્હૃદિ ભાવયુક્તૈ-
ર્મુમુક્ષુભિઃ કર્મમયોરુપાશાત્ ॥ ૭॥

ત્વં માયયા ત્રિગુણયાઽઽત્મનિ દુર્વિભાવ્યં
વ્યક્તં સૃજસ્યવસિ લુમ્પસિ તદ્ગુણસ્થઃ ।
નૈતૈર્ભવાનજિત કર્મભિરજ્યતે વૈ
યત્સ્વે સુખેઽવ્યવહિતેઽભિરતોઽનવદ્યઃ ॥ ૮॥

શુદ્ધિર્નૃણાં ન તુ તથેડ્ય દુરાશયાનાં
વિદ્યાશ્રુતાધ્યયનદાનતપઃક્રિયાભિઃ ।
સત્ત્વાત્મનામૃષભ તે યશસિ પ્રવૃદ્ધ-
સચ્છ્રદ્ધયા શ્રવણસમ્ભૃતયા યથા સ્યાત્ ॥ ૯॥

સ્યાન્નસ્તવાઙ્ઘ્રિરશુભાશયધૂમકેતુઃ
ક્ષેમાય યો મુનિભિરાર્દ્રહૃદોહ્યમાનઃ ।
યઃ સાત્વતૈઃ સમવિભૂતય આત્મવદ્ભિ-
ર્વ્યૂહેઽર્ચિતઃ સવનશઃ સ્વરતિક્રમાય ॥ ૧૦॥

યશ્ચિન્ત્યતે પ્રયતપાણિભિરધ્વરાગ્નૌ
ત્રય્યા નિરુક્તવિધિનેશ હવિર્ગૃહીત્વા ।
અધ્યાત્મયોગ ઉત યોગિભિરાત્મમાયાં
જિજ્ઞાસુભિઃ પરમભાગવતૈઃ પરીષ્ટઃ ॥ ૧૧॥

પર્યુષ્ટયા તવ વિભો વનમાલયેયં
સંસ્પર્ધિની ભગવતી પ્રતિપત્નિવચ્છ્રીઃ ।
યઃ સુપ્રણીતમમુયાર્હણમાદદન્નો

ભૂયાત્સદાઙ્ઘ્રિરશુભાશયધૂમકેતુઃ ॥ ૧૨॥

કેતુસ્ત્રિવિક્રમયુતસ્ત્રિપતત્પતાકો
યસ્તે ભયાભયકરોઽસુરદેવચમ્વોઃ ।
સ્વર્ગાય સાધુષુ ખલેષ્વિતરાય ભૂમન્
પાદઃ પુનાતુ ભગવન્ ભજતામઘં નઃ ॥ ૧૩॥

નસ્યોતગાવ ઇવ યસ્ય વશે ભવન્તિ
બ્રહ્માદયસ્તનુભૃતો મિથુરર્દ્યમાનાઃ ।
કાલસ્ય તે પ્રકૃતિપૂરુષયોઃ પરસ્ય
શં નસ્તનોતુ ચરણઃ પુરુષોત્તમસ્ય ॥ ૧૪॥

અસ્યાસિ હેતુરુદયસ્થિતિસંયમાના-
મવ્યક્તજીવમહતામપિ કાલમાહુઃ ।
સોઽયં ત્રિણાભિરખિલાપચયે પ્રવૃત્તઃ
કાલો ગભીરરય ઉત્તમપૂરુષસ્ત્વમ્ ॥ ૧૫॥

ત્વત્તઃ પુમાન્ સમધિગમ્ય યયા સ્વવીર્યં
ધત્તે મહાન્તમિવ ગર્ભમમોઘવીર્યઃ ।
સોઽયં તયાનુગત આત્મન આણ્ડકોશં
હૈમં સસર્જ બહિરાવરણૈરુપેતમ્ ॥ ૧૬॥

તત્તસ્થુષશ્ચ જગતશ્ચ ભવાનધીશો
યન્માયયોત્થગુણવિક્રિયયોપનીતાન્ ।
અર્થાઞ્જુષન્નપિ હૃષીકપતે ન લિપ્તો
યેઽન્યે સ્વતઃ પરિહૃતાદપિ બિભ્યતિ સ્મ ॥ ૧૭॥

સ્માયાવલોકલવદર્શિતભાવહારિ-
ભ્રૂમણ્ડલપ્રહિતસૌરતમન્ત્રશૌણ્ડૈઃ ।
પત્ન્યસ્તુ ષોડશસહસ્રમનઙ્ગબાણૈ-
ર્યસ્યેન્દ્રિયં વિમથિતું કરણૈર્ન વિભ્વ્યઃ ॥ ૧૮॥

વિભ્વ્યસ્તવામૃતકથોદવહાસ્ત્રિલોક્યાઃ
પાદાવનેજસરિતઃ શમલાનિ હન્તુમ્ ।
આનુશ્રવં શ્રુતિભિરઙ્ઘ્રિજમઙ્ગસઙ્ગૈ-
સ્તીર્થદ્વયં શુચિષદસ્ત ઉપસ્પૃશન્તિ ॥ ૧૯॥

ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે એકાદશસ્કન્ધે ષષ્ઠાધ્યાયાન્તર્ગતં
બ્રહ્માદિદેવૈઃ કૃતં શ્રીકૃષ્ણસ્તોત્રં સમાપ્તમ્ ।

ભાગવતપુરાણ । અધ્યાય ૧૧/૬/૭-૧૯ ॥

bhAgavatapurANa . adhyAya 11/6/7-19..

Proofread by PSA Easwaran

*Brahmadidevaih Kritam Shri Krishna Stotram*
pdf was typeset on October 3, 2025

Please send corrections to *sanskrit@cheerful.com*